শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীঘটিকাচলহনুমতস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते रामानुजाय नमः

# ॥শ্রীঘটিকাচলহনুমতস্তোত্রম্ ॥

শঙ্খচক্রধরং দেৱং ঘটিকাচলৱাসিনম্।
যোগারূঢং হ্যাঞ্জনেযং ৱাযুপুত্রং নমাম্যহম্॥ ১ ॥

ভক্তাভীষ্টপ্রদাতারং চতুর্বাহুৱিরাজিতম্।
দিৱাকরদ্যুতিনিভং ৱন্দেহং পৱনাত্মজম্॥ ২ ॥

কৌপীনমেখলাসূত্রং স্বর্ণকুণ্ডলমণ্ডিতম্।
লঙ্ঘিতাব্ধিং রামদূতং নমামি সততং হরিম্॥ ৩ ॥

দৈত্যানাং নাশনার্থায মহাকাযধরং ৱিভুম্।
গদাধরকরো যস্তং ৱন্দেহং মারুতাত্মজম্॥ ৪ ॥

নৃসিংহাভিমুখো ভূত্বা পর্ৱতাগ্রে চ সংস্থিতম্।
ৱাঞ্ছন্তং ব্রহ্মপদৱীং নমামি কপিনাযকম্॥ ৫ ॥

বালাদিত্যৱপুষ্কং চ সাগরোত্তারকারকম্।
সমীরৱেগং দেৱেশং ৱন্দে হ্যমিতৱিক্রমম্॥ ৬ ॥

পদ্মরাগারুণমণিশোভিতং কামরূপিণম্।
পারিজাততরুস্থং চ ৱন্দেহং ৱনচারিণম্॥ ৭ ॥

রামদূত নমস্তুভ্যং পাদপদ্মার্চনং সদা।
দেহি মে ৱাঞ্ছিতফলং পুত্রপৌত্রপ্রৱর্ধনম্॥ ৮ ॥

ইদং স্তোত্রং পঠেন্নিত্যং প্রাতঃ কালে দ্বিজোত্তমঃ।
তস্যাভীষ্টং দদাত্যাশু রামভক্তো মহাবলঃ॥ ৯ ॥

॥ ইতি শ্রীঘটিকাচলহনুমতস্তোত্রং সংপূর্ণম্ ॥

www.prapatti.com